4. दूरस्थेषु तेषु नक्षत्रेषु
5. कबन्धः

६. **अनुवादकः :- पूर्णचन्द्र उपाध्यायः** १६२
**कथाकारः :- श्री हरिप्रकाशराठी**
1. अपरिणतातपः

## काव्यायनम्

| | | | |
|---|---|---|---|
| ७. | **कैकयी-राम-संवादः** | लक्ष्मीनारायणशर्मा | १६८ |
| ८. | **काव्यद्वयी** | कैलाशनाथद्विवेदी | १७४ |

1. हिक्का
2. मा मारय मयूरम्

| | | | |
|---|---|---|---|
| ९. | **शृङ्गारदशकम्** | विवेककर्मकारः | १७७ |
| १०. | **काव्यपञ्चकम्** | हर्षदेवमाधवः | १७९ |

1. जगन्नाथपाठकाय
2.प्रतिलिपिः .... निश्लेषः (Copy… Paste)
3.काश्मीरम्
4.सन्त्रासवादिनः
5.सम्मार्जकाय

## ११. समीक्षायनम् १८६

1. सृजति शङ्खनादं किल कविता, 2. उमराव-जान-अदा, 3. संस्कृतसाहित्ये पर्यावरण विज्ञानम्, 4. ऊर्मिला, 5. परिसरनीतिशतकम्, 6. बुधशतकम्, 7. बोधकथासदनम्, 8. अनभिषङ्गः (कथासङ्ग्रहः), 9. करङ्कः -(लेखसङ्ग्रहः) **समीक्षकः- राधावल्लभः**, 10. चन्द्रिका-(कवितासङ्कलनम्), 11. मामकीनं गृहम्, **समीक्षिका- बी. कामाक्षम्मा**

## १२. सङ्केतवीथी २०९

मिश्रकवेः महत्याः काव्यसाधनायाः केचन एव पक्षा एव प्रकृतस्य काव्यसङ्कलनस्य व्याजेन मया कीर्तिताः। वस्तुतोऽत्यन्तं विशालोऽस्य काव्यपरिधिः। युक्तमुक्तवन्तो ज्ञानोपाह्वाः बच्चूलालावस्थिन एतस्य काव्यसाधनामधिकृत्य -

**प्राग्भारो भूमिभूतेर्भवभविकभरो भारतीमर्मसारो**
**वात्सल्याद् गात्रगोत्रे जननिमृदुकरामर्शचारोऽत्युदारः।**
**वादः कोऽपि च तौर्यत्रिकरसमिलितः स्वर्गसौभाग्यनादो**
**विन्ध्येश्वर्याः प्रसादः प्रभवतु सुधियां भावधारासु शश्वत्॥**

विनय इति स्वीयं नाम चरितार्थयन्नयं कविः न कदापि आत्मप्रदर्शने आत्मगौरवे स्वयमेव आत्मनोऽभिनन्दनग्रन्थादिप्रकाशनसदृश उद्यमे वा रुचिं प्रकटीचकार। अतोऽयमुपेक्षितो वर्तते। परन्तु सरस्वती तु एनमनुगृह्णाति। यथा सैनमनुगृह्णाति, आयासेन प्रसिद्धिं प्राप्तान् बहून् कविम्मन्यान् तथा सा नानुगृह्णाति। सरस्वत्याः स्वारस्यमेवान्ततो साहित्यसंसारे विजयते न नरस्याडम्बर इत्यलं विस्तरेण।

**( राधावल्लभः )**

**२. उमराव-जान-अदा - मिर्जामोहम्मदहादीरुस्वारचितस्य उर्दूभाषानिबद्धस्य उपन्यासस्य संस्कृतानुवादः, अनुवादकः - श्वेतकेतुः, प्र. अखिलभारतीय-मुस्लिमसंरक्षण एवं प्राच्यशोधसंस्थानम्, वाराणसी, २०१६**

उर्दूभाषाया साहित्ये मिर्जामोहम्मदहादीरुस्वारचितः उमराव-जान-अदेति उपन्यासः सुविश्रुतः। उपन्यासोऽयं 1899तमे क्रिस्त्वब्दे विरचितः। एनमाश्रित्य विनिर्मितं मुम्बई-चलचित्रमप्येकमतितरां लोकप्रियं कदाचिज्जातम्। उपन्यासोऽयं भारतीयायाः किमपि मर्म उद्घाटयति, अस्माकं संस्कृतेः अस्पृष्टान् पक्षान् अनावृणुते, इतिहासस्य विस्मृतांश्चाध्यायान् पुनः स्मारयति च। हृदयस्य हाहाकारं ध्वनयन्ती नारीजीवनस्य वेदनायाः कामपि काष्ठां निर्दिशन्ती नितरां कारुणिकी चास्य कथा। विशिष्टैव कापि कथाकथनशैली चात्र निपुणेन कथाकारेण उपात्ता। ऊनविंशशतके लखनऊनगरे मुस्लिमजनानां साहित्यिकसमाजे तथा च तत्रत्यवेशवाटेषु या भाषा

प्रयुज्यते स्म, तस्या सजीवं प्रामाणिकं च निदर्शनमुपन्यासकारेणात्र विहितम्। एतादृशस्य भारतीयसाहित्यगौरवग्रन्थस्य अनुवादकरणं कस्यामपि भाषायां विशेषत: संस्कृते नितरां सहजं न वरीवर्तीति नात्र संशीति:। अनेकेभ्य: वर्षेभ्य: उर्दू-फारसी-भाषयोरभ्यासं कृतवता काशीस्थयुवसंस्कृतपण्डित- मण्डल्यामग्रगण्येन श्वेतकेतुना उमराव- जान- अदाया: विच्छित्तयो विलासा: मसृणता कारुणिकता च संस्कृते अवतारितेति असाधारणमस्य समकालिकसंस्कृतसाहित्येऽवदानम्। अस्य अनुवादस्य प्रकाशनं संस्कृतजगति महत्त्वाध ायिनी कापि घटनेति मन्ये।

गौरवग्रन्थानां स्वभाषायामनुवादाय कियती साधना करणीया भवतीति अस्य अनूदितस्योपन्यासस्य षष्टिपृष्ठेषु विततया भूमिकया ज्ञायेत। 1857ई.-वर्षे लब्ध जने: महत: कथाकारस्य उर्दूभाषाया: टङ्कणयन्त्राय इदम्प्रथमतया कुञ्जिकापटलनिर्माणकर्तु: तस्या भाषाया आशुलिपेराविष्कारविचक्षणस्य मिर्जाहादीरुस्वावर्यस्य विस्तृत: परिचयोऽत्र अनुवादकेन प्रादायि, रुस्वा-प्रणीतस्योपन्यासस्य विशेषाश्च कीर्तिता:, समं चौतस्य उपन्यासस्य अनुवादविध ानाय तेन नैकानि वर्षानि के के पर्वता उत्तोलिता इत्यपि असौ विवणुते। असौ सहृदयशिरोमणिना संस्कृतपण्डितेन सय्यिदहुसैनशास्त्रिणा सह मुहुर्मुहु: सम्पर्कं कृतवान्। सय्यिदहुसैनशास्त्रिण: संस्कृतपाण्डित्यं वैदग्ध्यं चानुभूय भवानेव रुस्वाविरचितस्य उपन्यासस्य संस्कृतानुवादं करोत्विति तमनुरुरोध। सय्यिदहुसैनपण्डितश्चौनं संस्कृतेन स्वपत्रे इत्थमुदतरयत् -

**''भवन्तस्तावत् स्वयेमेव योग्या एतस्मिन् कर्मणि जराविगलितेन्द्रियग्रामा इह वयं के तादृग् दुरूहोपन्यासम् अमरवाचि रूपान्तरयितुम्, अथ मद्वचनं प्रमाणीकृत्य भवता अयमुपन्यासो निश्चयेन कदाचित् संस्कृते रूपान्तरयितव्य:.** ..'' इति।

कथमनुवादकेन श्वेतकेतुना फारसीभाषासाहित्ययो: विशेषज्ञ आचार्यसैयदहसनाब्बास: परामृष्ट:, कवितल्लजं विपश्चिद्वरेण्यं जगन्नाथपाठकं बारं बारमुपेत्य तेन स्वोपज्ञस्यानुवादस्य परीक्षणं परिशीलनं च कारितम्, उर्दूकाव्यधाराया:

परिचयाय अस्मिन्नुपन्यासे वर्णितस्य सङ्गीतस्य विशेषाणां विज्ञानाय केभ्य उपदेशो गृहीतः इति अनुवादस्य विस्तृतया भूमिकया ज्ञातुं शक्यम्, उपन्यासे प्रयुक्तानां विलक्षणानां प्रोक्तीनामाभाणकानां संस्कृतानुवादाय कीदृशः संरम्भोऽनेन विहित इत्यपि भूमिकायामसौ सोदाहरणं प्रत्यपीपदत्। उमराव-जान-अदेत्युपन्यासस्य हिन्दी- अङ्ग्रेजी- स्पेनिश- पालिश- प्रभृतिभाषासु अनुवादाः विहितचराः। महाकविना रघुपतिसहायफिराकेण एतस्य उपन्यासस्य लिप्यन्तरं साधितम्, तस्यापि मातृकां सम्प्राप्य उर्दूलिप्यां मुद्रितपुस्तकेन मेलनम् अनुवादकः कृतवान्। उर्दूफारसी-अरबीभाषागताः विशिष्टशब्दाः आभाणकाश्चापि भूमिकायां सूचीसु निवेशिताः।

श्वेतकेतोः अनुवादे उमराव-जान-अदाया आत्मवृत्तं बाणभट्टस्य महाश्वेतावृत्तान्तमिवारुन्तुदम् करुणामहाप्रवाहपरिप्लुतं प्रतीयते। तस्या उपोद्घातवाक्यमेव एतत् प्रमाणयति –

''मिर्जा रुस्वा साहब, किमुत्कृत्योत्कृत्य भवन्तो मां पृच्छन्ति? .. इह मन्दभाग्याया मम वृत्तान्ते किन्नामासौ आनन्द यस्य भवन्तोऽभिलाषिणः?... एकस्या हतभाग्यायाः, अपूर्णमनोरथायाः, अशरण्यायाः विनष्टगृहधनधान्यायाः, कुलकलङ्किन्याः द्वयोरपि लोकयोः शोच्यायाश्च वृत्तान्तं समाकर्ण्य कथमपि न मे समाश्वासो यद्भवान् प्रसन्नो भविता।

**''तथाप्यस्ति कौतूहलं चेत् श्रूयताम्...''**

हर्षचरिताद्याख्यायिकास्विव प्रत्येकं परिच्छेदस्य समारम्भे कथाकारेण निवेशितानि मध्ये मध्ये च उमरावजानवर्यया समायोजितासु सङ्गोष्ठीषु प्रस्तुतानि वा यानि उर्दूपद्यानि उपन्यासे लसन्ति, तेषामपि अनुवादं गद्यबन्धानामिव मनोहरं विहितवाननुवादकः। दिङ्मात्रमुदाह्रियते –

**यौवनागम एव सूते छन्दतः स्वच्छन्दतां,**
**वयन्तु एतज्ज्ञाः वरं विज्ञेषु कथमावेद्यताम्?॥**
**...**
**रुस्वां कथमगाः पुनस्त्वं खलु प्रेम्णा,**

**त्यक्ष्याम्हं न त्वामपि 'रुस्वा'-कृतिं विना।**

...

**युगेभ्य इह वयं वञ्चिता मानैः,**

**अधसभ्यमद्य ते खलु समुत्थाप्याः।**

श्वेतकेतुना एनमनुवादं विधाय काऽपि दिगुन्मीलिता। उर्दूभाषाया कथासाहित्यं वस्तुतो नितरां विशिष्टं सम्पन्नं च वर्तते, अन्या अपि एवंविधाः कृतयस्तत्रत्याः कृतिभिः पण्डितैः संस्कृतेनानूद्यन्तामिति अपेक्षा अनेनास्योपक्रमेण जागरितेत्यलं विस्तरेण। **( राधावल्लभः )**

**३. संस्कृतसाहित्ये पर्यावरणविज्ञानम् - प्रधानसम्पादकः पूर्णचन्द्र उपाध्यायः, सम्पादकौ - धर्मेन्द्रकुमारसिंहदेव-नारायणदाशौ, वीणापाणि संस्कृत समितिः भोपालम्, २०१६**

राजस्थानसंस्कृताकादेम्याः साहाय्येन बून्दीनगर्याः सुप्रतिष्ठिते महाविद्यालये तथैव च निकषा बालेश्वरं जागेश्वरपदायां अवस्थितस्य भगवानचन्द्रसंस्कृतमहाविद्यालयस्य संस्कृतविभाग च 'संस्कृत- साहित्ये पर्यावरण'मिति विषयमधिकृत्य सङ्गोष्ठयौ आयोजिते। उभययो सङ्गोष्ठ्योः एकवाक्यतामभिलक्ष्य पूर्णचन्द्रादिभिः एतयोः प्रस्तुतानि भाषणानि लेखाश्च अस्मिन् ग्रन्थे सङ्कलिताः। अत्र आधुनिकं संस्कृतसाहित्यं विशिष्य चर्चापदं प्रापितमिति नवीनता। आधुनिकसंस्कृतसाहित्यविषये बनमालिबिस्वाल-नारायणदाश- पूर्णचन्द्रोपाध्याय- धर्मेन्द्रकुमारसिंहदेव-कल्पनाशृङ्गी- प्रमोदकुमारवैष्णव-नौनिहालगौतमादीनां लेखाः अत्र लसन्ति, तथैव रमाकान्तशुक्ल- हरिनारायणदीक्षित-राधावल्लभत्रिपाठि- वेदकुमारीघई- प्रशस्यमित्रशास्त्रि- हरेकृष्णशतपथीप्रभृतीनां च लेखाः संस्कृतसाहित्ये पर्यावरणचेतनोन्मीलनं विवेचयन्ति। प्राचीनकविषु कालिदासादीनां कृतिषु पर्यावरणस्य नाना पक्षा अत्र उन्मीलन्ति। साकल्येनात्र 39लेखाः समाविष्टाः। इयं सर्वापि सामग्री संस्कृते पुरातने नवीने च संस्कृतसाहित्ये पर्यावरणनिरूपणस्य विविधान् पक्षानुन्मीलयतीति दिक्। **( राधावल्लभः )**